# Shri Nrisimha StotraM

# શ્રીનૃસિંહસ્તોત્રમ્

## Document Information

Text title : Shri Nrisimha StotraM

File name : nRRisiMhastotramshrIdharasvAmI.itx

Category : vishhnu, shrIdharasvAmI, stotra, dashAvatAra, pancharatna

Location : doc_vishhnu

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

Shri Nrisimha StotraM

# શ્રીનૃસિંહસ્તોત્રમ્

(સુરનિમ્નગા વૃત્તમ્)
ભવનાશનૈકસમુદ્યમં કરૂણાકરં સુગુણાલયં
નિજભક્તતારણરક્ષણાય હિરણ્યકશ્યપુઘાતિનમ્ ।
ભવમોહદારણકામનાશનદુઃખવારણહેતુકં
ભજપાવનં સુખસાગરં નરસિંહમદ્વયરૂપિણમ્ ॥ ૧॥

ગુરૂ સાર્વભૌમમર્ઘાતકં મુનિસંસ્તુતં સુરસેવિતં
અતિશાન્તિવારિધિમપ્રમેયમનામયં શ્રિતરક્ષણમ્ ।
ભવમોક્ષદં બહુશોભનં મુખપઙ્કજં નિજશાન્તિદં
ભજપાવનં સુખસાગરં નરસિંહમદ્વયરૂપિણમ્ ॥ ૨॥

નિજરૂપકં વિતતં શિવં સુવિદર્શનાયહિતત્ક્ષણં
અતિભક્તવત્સલરૂપિણં કિલ દારુતઃ સુસમાગતમ્ ।
અવિનાશિનં નિજતેજસં શુભકારકં બલરૂપિણં
ભજપાવનં સુખસાગરં નરસિંહમદ્વયરૂપિણમ્ ॥ ૩॥

અવિકારિણં મધુભાષિણં ભવતાપહારણકોવિન્દ
સુજનૈઃસુકામિતદાયિનં નિજભક્તહૃત્સુવિરાજિતમ્ ।
અતિવીરધીરપરાક્રમોત્કટરૂપિણં પરમેશ્વરં
ભજપાવનં સુખસાગરં નરસિંહમદ્વયરૂપિણમ્ ॥ ૪॥

જગતોઽસ્ય કારણમેવ સચ્ચિદનન્તસૌખ્યમખણ્ડિતં
સુવિધાયિમઙ્ગલવિગ્રહં તમસઃપરં સુમહોજ્વલમ્ ।
નિજરૂપમિત્યતિસુન્દરં ખલુસંવિભાવ્ય હૃદિસ્થિતં
ભજપાવનં સુખસાગરં નરસિંહમદ્વયરૂપિણમ્ ॥ ૫॥

પઞ્ચરત્નાત્મકં સ્તોત્રં શ્રીનૃસિંહસ્ય પાવનમ્ ।
યે પઠન્તિ મુદાભક્ત્યા જીવન્મુક્તા ભવન્તિતે ॥ ૬॥

॥ ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરૂ ભગવાન
શ્રીધરસ્વામીમહારાજવિરચિતં શ્રીનૃસિંહસ્તોત્રં સમ્પૂર્ણમ્ ।

રચનાકાળઃ શ્રીનૃસિંહજન્મોત્સવઃ

રચનાસ્થળઃ વરદપુરમ

*Shri Nrisimha StotraM*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*